ॐ

# ॥ कावेरी-पुष्कर-अनुष्ठान-सङ्कल्पः ॥

(आचम्य ।) शुक्लाम्बरधरं + शान्तये । (प्राणानायम्य सङ्कल्पं करोति ।)

तदेव लग्नं + अङ्घ्रियुगं स्मरामि । अपवित्रः पवित्रो + शुचिः । मानसं + न संशयः । श्रीराम राम राम । तिथिर्विष्णुः + जगत् । श्रीहरे गोविन्द गोविन्द गोविन्द । ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् –

भगवतः नारायणस्य परमेश्वरस्य अचिन्त्यया अपरिमितया शक्त्या ध्रियमाणस्य महाजलौघस्य मध्ये परिभ्रमताम् अनेककोटिब्रह्माण्डानाम् एकतमे चतुर्दशभुवनान्तर्गते भूमण्डले सप्तद्वीपमध्ये जम्बूद्वीपे नववर्षमध्ये भारतवर्षे नवखण्डमध्ये भरतखण्डे हिमाचल-कैलास-विन्ध्याचलादि-अनेकपुण्यशैल-शिखरिते दण्डकारण्य-विन्ध्यारण्य-वेदारण्यादि-अनेकपुण्यारण्य-वनश्री-भास्वरे अस्मिन् भारतदेशे प्रवहन्तीनां –

प्रियाः मातर इव पयसा प्रजाः पुष्णतीनां नदीनाम् अन्यतमायां कावेरीनाम्न्याम् –

1. कर्णाटकेषु कौडगु-इतिख्यात-मलयाचलसंज्ञक-सह्याद्रि-प्रदेशे सम्भूतायां, द्रविडेषु श्वेतारण्यक्षेत्रसमीपे कावेरीपत्तनाख्ये पुण्यस्थले समुद्रं प्राप्नुवत्याम्,
2. साक्षाद् विष्णु-माया-रूपिण्यां, चतुर्मुखस्य कन्यात्वेन स्थितायां, तदनुग्रहात् कवेरनाम्नो राज्ञः पुत्रीत्वं प्राप्तायां, मनुष्यरूपेण लोपामुद्रानाम्ना अगस्त्यपत्नीत्वं गतायां, तीर्थरूपेण तत्कमण्डलु-स्थितायां,
3. भगवता नारायणेनैव दक्षिणगङ्गात्वेन उक्त्वा,

   त्रिरात्रं जाह्नवीतीरे पञ्चरात्रं तु यामुने। सद्यः पुनाति कावेरी पापम् आ-मरणान्तिकम्॥

   इति च प्रशस्तायाम्, भगवता महेश्वरेण "अहं तव उत्पत्तिस्थान-प्रभृति समुद्र-सङ्गम-पर्यन्तम् उभयोः कूलयोः वत्स्यामि" इति अनुगृहीतायाम्,
4. तुला-सङ्क्रमण-पुण्यकाले भगवता गणेशेन काक-रूप-धरेण अगस्त्य-कमण्डलोः निपातितायां, सह्याद्रि-गत-नारायणांश-आमलक-वृक्ष-मूल-सम्भूतायां, ब्रह्म-कमण्डलु-स्थित-शङ्ख-निनीत-विरजा-तीर्थ-सङ्गतायाम्, सह्यामलकतीर्थ-शङ्खतीर्थ-समाख्या-प्रसिद्धायाम्, वेदघोष-तुल्य-शब्देन महावेगेन शिला-वृक्षादि-घर्षणेन ऋजु-वक्र-मण्डलादि-अनेकाकारेण समुद्राभिमुखं प्रवाहितायां,
5. शिरःस्थान-स्थित-दत्तात्रेयायाम्, अङ्क-स्थान-शयित-रङ्गनाथायां, श्रीवैकुण्ठ-रूपान्तर-श्रीरङ्ग-क्षेत्र-मण्डितायां,
6. तुलामास-पुण्यकाले तुलापुष्कर-पुण्यकाले च सर्वलोकगत-सार्धत्रिकोटि-पुण्यतीर्थ-सङ्गतायाम्, अर्धोदय-महोदयादि-काले अतिविशिष्ट-स्नानायाम्,
7. तूष्णीं-स्नानेन अपि सप्त-जन्म-पाप-विनाशिन्यां, नियम-पूर्वक-स्नानेन उभय-वंश-सप्त-पुरुष-उद्धारण-कारिण्याम्, अनेक-नरकयातना-निवृत्ति-हेतु-भूतायां, साक्षात्-स्नान-अशक्तानाम् आनयनेन, शीतल-पान-अशक्तानाम् उष्णीकरणेन अपि स्नानेन पुण्यदायाम्
8. विश्वामित्र-अर्जुनादि-महापुरुषैः सेवितायां, वेदराशिनामकस्य तपःशीलस्य विप्रस्य अत्यन्त-पुण्यातिशय-प्रदानेन प्रसिद्धायाम्, अश्वमेध-यागं कर्तुम् उद्युक्ताय हरिश्चन्द्र-महाराजाय तद्-योग्यता-सिद्ध्यर्थम् नारदेन अगस्त्येन च उपदिष्ट-स्नानायाम्

9. आयुरारोग्य-प्रदायां, जप-पुरश्चरण-व्रतादि-सिद्धिप्रदायाम्
10. देवानाम् ऋषीणां पितृणां मनुष्याणां प्राणिनां सर्वभूतवर्गाणां परमतृप्तिप्रदायाम्

एवमादिबहुगुणविशेषणविशिष्टायाम् अस्यां कावेरी-महानद्याम् –

समस्त-हरिहरदेवता-गुरुचरण-श्रोत्रिय-सन्निधौ –

ब्रह्मणः द्वितीयपरार्धे पञ्चाशद्-अब्दादौ प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे अह्नि द्वितीये यामे तृतीये मुहूर्ते सप्तमे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये हेमलम्ब*नामसंवत्सरे दक्षिणायने वर्षऋतौ सिंह-भाद्रपद-मासे कृष्णपक्षे सप्तम्यां शुभतिथौ भौमवासरयुक्तायां कृत्तिकानक्षत्रयुक्तायां हर्षणयोग-भद्राकरण-युक्तायाम् अस्यां सप्तम्यां शुभतिथौ तुलागते देवगुरौ पुष्करपुण्यकाले –

अस्माकं सर्वेषां महाजनानां क्षेम-स्थैर्य-वीर्य-विजय-आयुः-आरोग्य-ऐश्वर्याणाम् अभिवृद्ध्यर्थं, धर्म-अर्थ-काम-मोक्ष-रूपचतुर्विध-फल-पुरुषार्थसिद्ध्यर्थम्, इष्ट-काम्यार्थ-सिद्ध्यर्थं, जनानां धर्मैक-श्रद्धा-प्रवृत्ति-उभय-सिद्ध्यर्थं दुराचार-निवृत्तिपूर्वक-सदाचार-सम्पत्त्यर्थं, तेन अतिवृष्टि-अनावृष्टि-राहित्येन पर्याप्त-वृष्ट्या वापी-कूपादि-जलाशयानां सम्पूर्त्यर्थम्, उपनदी-सहितासु कावेरी-ताम्रपर्णी-पिनाकिनी-तुङ्गभद्रा-कृष्णा-गोदावरी-प्रभृतिषु सम्यक्-प्रवाह-सिद्ध्यर्थं, जनानां जलसम्पदः सम्यग्-विनियोगे श्रद्धायाः उदयार्थं, परिसर-प्रदूषण-परिहारेण पृथिव्याः ताप-शान्त्यर्थं, तद्द्वारा देशेऽस्मिन् सर्वधान्यानाम्, औषधादि-गुणयुक्तानां सस्यानाम्, छाया-फलादि-प्रदानां वृक्षाणां च समृद्ध्यर्थं, गवादीनां बहुक्षीरादि-प्रदत्वार्थम्, अनेन सर्वेण एतद्देशनिवासिनां सुख-शान्त-जीवन-सिद्ध्यर्थम् –

1. भगवतो बृहस्पतेः पुण्यकाल-प्रयोजक-सङ्क्रमण-कर्तुः

देवानां च ऋषीणां च गुरुं काञ्चन-सन्निभम् । बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥

इति प्रणुतस्य,

2. तत्प्रार्थनया ब्रह्मणः कमण्डलोः आगत्य,

यदा राशिप्रवेशः स्यात् तदाप्रभृति सर्वदा । द्वादशाहमिते काले वस्तव्यं तु ममाज्ञया ॥
आवत्सरं तु वस्तव्यं मध्याह्ने द्विमुहूर्तकम् । अन्ते द्वादश वस्तव्यं दिनानि च यथासुखम् ॥

इति ब्रह्मणो निदेशेन नद्याम् अस्यां वसतः सार्धत्रिकोटितीर्थराजस्य पुष्करपुरुषस्य च,

3. तेन संयुतायाश्च भगवत्याः कावेर्याः

दुर्भोजन-दुरालाप-दुष्प्रतिग्रह-सम्भवम्। पापं हर मम क्षिप्रं सह्यकन्ये नमोऽस्तु ते॥
सह्यपादोद्भवे देवि श्रीरङ्गोत्सङ्गगामिनि। श्रीकावेरि नमस्तुभ्यं मम पापं व्यपोहय॥

इत्यादिना प्रार्थितायाः

पूजां, तदनु स्नानं, तदनु यथाशक्ति विहितानि दानानि, अन्यानि च धर्मकार्याणि यथासम्भवं करिष्यामहे ॥

-०-

* अधोरेखाङ्कितानि पदानि कालानुकूलं यथोचितं विपरिणमयत ।